In Public domain. Digitization Muthulakshmi Research Academy

स्वातिशयं लभते, स्वपरिस्पन्दात्मतया प्राप्नोति । अयं भावः—श्रीमद्देशिकनाथ-कटाक्षपातसमसमयमेव पुंसां स्वहृदयसंवादसौन्दर्यशालिनो जीवन्मोक्षलक्षणस्य पुरुषार्थस्योपलम्भ इत्यत्र न काचिद् विप्रतिपत्तिः । एवं च सर्वसाम्यस्वभावा स्वस्वरूपावस्थितिरेव जीवन्मुक्तिर्महार्थमतसंमता ।

उक्तलक्षणा जीवन्मुक्तिरियं स्वात्मविमर्शलक्षणक्रमपरामर्शेनोन्मील्यते । क्रमपरामर्शप्रक्रिया चेत्थं निदर्शिता परिमलकारेण—सृष्ट्यादिषु चतुर्षु कृत्येषु सृष्टिसृष्टिः, सृष्टिस्थितिरित्यादिक्रमेण प्रत्येकं चातुर्विध्यम्, पर्यन्ततो भासापर्यवसायित्वं च । भासा च स्वरूपनिष्कर्षावलोकने संविदैक्यपरामर्शचमत्कारसारापि विश्वप्रतिबिम्बयुक्त्यनुप्रविष्टप्रपञ्चस्वभावानुकारितया पञ्चकस्वरूपैवेति पञ्चापि कृत्यानि प्रत्येकं पञ्चकात्मकतां नातिक्रामन्ति । तेषु च पूर्वपूर्वपञ्चकस्य पञ्चमीं कलामवलम्ब्योत्तरोत्तरस्य पञ्चकस्य प्राथमिकी परिस्फुरति । एवमुत्तरोत्तर-पञ्चकप्रथमस्फुरत्तानामधोधःपञ्चकपर्यन्तशक्तिषु विश्रान्त्यनुभव इत्युत्पलदल-दशशतविदलनलाघवोल्लासवत् क्रमसङ्कावेऽप्यसंलक्ष्यक्रमा पारमेश्वरी पञ्च-कृत्यचक्रनिर्व्यूढिरत्यन्तगाढाभ्यासैः प्रौढैः कैश्चिद् विभ्रष्टव्यतयाऽवतिष्ठते । इत्थमेष क्रमपरामर्श एव स्वात्मविमर्शरूपो जीवन्मोक्ष इति ।

वैष्णवदार्शनिकैर्जीवन्मुक्तिर्नाङ्गीक्रियते । तथाहि रामानुजेन समन्वयाधि-करणभाष्ये—"तत एव जीवन्मुक्तिरपि दूरोत्सारिता" इत्यादिना "अतः सकलभेद-निवृत्तिरूपा जोवन्मुक्तिर्जीवतो न संभवति" इत्यन्तेन ग्रन्थेन प्रत्याख्याता सा । एष च प्रत्याख्यानप्रकारः स्वात्मविमर्शरूपायां सर्वसाम्यस्वभावायां स्वस्वरूपाव-स्थितिप्रख्यायां जीवन्मुक्तौ सर्वथा न घटत इति नासंभावनादोषग्रस्तः स्वातन्त्र्या-द्वैतवादिनां जीवन्मोक्षः ।

उपसंहारः

एवमत्र महार्थमञ्जर्यां परिमले च प्रतिपादिताः केचन सांस्कृतिका दार्शनिकाश्च विषया यथामति विवेचिताः । अत्र षट्त्रिंशत्तत्त्वानां स्फुरणप्रकारः, श्रीपीठ-पञ्चवाह-नेत्रत्रय-वृन्दचक्रप्रतिपादनपरः क्रमसपर्याविधिश्च विस्तरेण प्रतिपादितो ग्रन्थाध्ययनेनैव परिज्ञायेतेति कृत्वा नास्माभिरालोचितः । क्रमदर्शने कालीनां द्वादशविधत्वं त्रयोदशविधत्वं वेत्यत्र पक्षद्वयं तन्त्रालोकविवेके चतुर्था-ह्निके १७३ तमश्लोकव्याख्यायां जयरथेन विस्तरेण प्रतिपादितम् । अत्र परिमलकारो महानयप्रकाशप्रामाण्येन कालीनां त्रयोदशविधत्वमेवाङ्गीचकार (पृ० १०१) । अधुना एतावदेवोक्त्या विरम्यते ॥

●

(1)

सात्वतीयं दर्शनम्

अलशिङ्गभट्टविरचितेन भाष्येण सहिता सात्वतसंहिता पाञ्चरात्रा-गमीया न चिरादेव सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः प्रकाशिता भविष्यति । तदाधारीकृत्य किञ्चिदिवात्र सात्वतीयं दर्शनं विविच्यते ।

आगमग्रन्थेषु संहिताग्रन्थेषु च 'ज्ञान-योग-क्रिया-चर्यात्मकः पादविभागो' दृश्यते, किन्तु त्रिरत्ननाम्ना प्रख्यातासु सात्वत-पौष्कर-जयाख्यासु तन्नास्ति[2] । अथापि ज्ञान-योग-क्रिया-चर्यापादेषु प्रतिपादिताः सर्वे विषयाः संक्षेपेण विस्तरेण वा प्रकरणबद्धा विप्रकीर्णा वा तासु विद्यन्त एव । जयाख्यसंहितायाम्,

१. "पशुपाशपतिज्ञानं ज्ञानमित्यभिधीयते । पञ्चधशुद्धिविधिना गुर्वधीना क्रियोच्यते ॥ वर्णाश्रमप्रयुक्तस्य मयैव विहितस्य च । ममार्चनादिधर्मस्य चर्या चर्येति कथ्यते ॥ मदुक्तेनैव मार्गेण मय्यवस्थितचेतसः । वृत्त्यन्तरनिरोधो हि योग इत्यभिधीयते ॥" (७।२।१०।३१-३३) इत्येवं शिवपुराणे तेषां लक्षणानि दृश्यन्ते, "विवेको यत्र तत्त्वानां कार्यकारणभेदतः । यथावदुचितं वस्तु हेयं चैत्रोपचर्यते ॥ विद्यापादः स विज्ञेयः" (२।८-९), "मुद्रामण्डलमन्त्राणां लक्षणं साधकात्मनाम् । आचार्याणां च ..... क्रियापादः स विज्ञेयः ॥" (२।१०-११), "यत्रोपायो विरक्तानां षडङ्गः सुमहात्मनाम् ॥ रागिणामपि भोगार्थं योगपादः स उच्यते ।" (२।११-१२), "समयाचारसद्वादस्थितिः स्वाम्नायलक्षणः । चर्यापादः स उद्दिष्टः" (२।१३) इति च मतङ्गपारमेश्वरे विद्यापादे । अत्र ज्ञानं विद्येत्यनर्थान्तरम् । विभिन्ने-ष्वागमेषु लक्षणानामेतेषां संकरोऽपि दृश्यत इत्यजितागमप्रथममागसंस्कृतोपोद्घाते (पृ० १०-११) पाण्डिचेरीमुद्रिते द्रष्टव्यम् ।

२. वैष्णवशैवशाक्तादिष्वागमेषु बौद्धशाक्तादिषु तन्त्रेषु चैष पादविभागो दृश्यते । तत्र बौद्धेषु तन्त्रेषु ज्ञानपदस्य स्थानेऽनुत्तरपदं प्रयुज्यते । शैवेष्वागमेषु च विद्यापाद-नाम्ना प्रथमः पादः प्रसिद्धयति ।

३. पादविभागो न दृश्यत इत्यतोऽपि पादविभागात्मकसंहितागमापेक्षया रत्नत्रयस्य प्राचीनता प्रसिद्धयति । संहितात्रयेऽपि वर्तते सात्वतायाः परिच्छेदविभागात्मकं वैशिष्ट्यम् । संहिताग्रन्था आगमग्रन्थास्तन्त्रग्रन्था वा पटलेष्वध्यायेषु वा विभक्ता दृश्यन्ते । यथा जयाख्यायां पटलविभागः, पौष्करायां चाध्यायविभागः । परिच्छेद-विभागस्तु सात्वतां विहाय क्वाप्यन्यत्र नावलोक्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

अहिर्बुध्न्यसंहितायाम्, लक्ष्मीतन्त्रे वा यथा ग्रन्थारम्भे साटोपं दार्शनिकं[1] विवेचनं वर्तते, न तथा दृश्यते सात्वतपौष्करयोः[2]। सात्वतसंहितायां दर्शनप्रतिपादका अंशाः प्रायः सम्पूर्णे ग्रन्थे विप्रकीर्णा वर्तन्ते। तान् संगृह्यात्र त्रिविधपरब्रह्मस्वरूपं मन्त्रात्मकं तदुपासनविधिं च संक्षेपेण समुपस्थापयामः।

त्रिविधं परं ब्रह्म

"त्रिविधेन प्रकारेण परमं ब्रह्म शाश्वतम्। आराधयन्ति ये तेषां रागस्तिष्ठति दूरतः॥" (१।२३) इति परब्रह्मणस्त्रिविधां सत्तां संसूच्य—"षाड्गुण्यविग्रहं देवं भास्वज्ज्वलनतेजसम्। सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्॥ परमेतत् समाख्यातमेकं सर्वाश्रयं प्रभुम्।" (१।२५-२६) इत्येवं परब्रह्मणः स्वरूपमत्र वर्णितम्। तदनु—"एतत्पूर्वं त्रयं चान्यज्ज्ञानाद्यैर्भेदितं गुणैः॥ विद्धि तद् व्यूहसंज्ञं सन्निःश्रेयसफलप्रदम्।" (१।२६-२७) इत्येवं वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्यस्य व्यूहचतुष्टयस्य स्वरूपं निरूप्य, "मुख्यानुवृत्तिभेदेन युक्तं ज्ञानादिकैर्गुणैः। नानाकृतिं च तद्विद्धि वैभवं भुक्तिमुक्तिदम्॥" (१।२७) इति संक्षेपेण विभवस्वरूपं व्याख्यातम्।

अत्र पराशरभट्टपादा विष्णुसहस्रनामभाष्येऽमुमेवं ग्रन्थं व्याकुर्वन्त एवमाहुः—"परव्यूहविभवात्मना त्रिविधं परंब्रह्मेति भागवतसिद्धान्तः। तत्र परं-

१. जयाख्याया दार्शनिकं विवेचनं डॉ० सुरेन्द्रनाथदासगुप्तकृते दर्शनेतिहासे तृतीये खण्डे, अहिर्बुध्न्यसंहिताया डॉ० श्रादरकृते भूमिकाग्रन्थे, लक्ष्मीतन्त्रस्य च डॉ० अशोककुमारकालियाविरचिते "लक्ष्मीतन्त्र : धर्म और दर्शन" इत्याख्ये ग्रन्थे द्रष्टव्यम्।

२. त्रिरत्नेष्वेकतमायाः श्रीरङ्गक्षेत्रे मानितायाः पौष्करसंहिताया अद्यावधि शोभनं संस्करणं नामूदिति खेदावहोऽयं विषयः। पारमेश्वरसंहितापराशरभट्टकृतविष्णुसहस्रनामभाष्यादिविविधग्रन्थसाहाय्येन कार्यमेतत्सम्पादयितुं शक्यते। यथा हि—"केशवः क्लेशहा लोके द्वैरूप्येण क्षितौ स्थितः। मथुराख्ये महाक्षेत्रे वाराणस्यामपि द्विज॥" इत्यत्रत्य उत्तरार्धः पौष्करसंहितायां ग्रन्थस्य त्रुटितत्वान्न दृश्यते (३६।३०६)। विष्णुसहस्रनामभाष्ये तु पराशरभट्टेन केशव(६५४)-शब्दव्याख्यानावसरे सम्पूर्णः श्लोको धृतः। अत्र वाराणस्यां स्मृतः केशवोऽयमादिकेशवादभिन्नः स्यात्। कृष्णमिश्रेण प्रबोधचन्द्रोदयनाटके वाराणसीवसतेरादिकेशवस्यायतनमेवं वर्ण्यते—"पश्य पश्य! तदिदं सुरसरित्परिसरालङ्कारभूतं भगवतः पावनमनादेरादिकेशवस्य विष्णोरायतनम्" (पृ० १६१) इति।

नामाकार्यं कार्यादनवच्छिन्नपूर्णषाड्गुण्यमहार्णवोत्कलिकैकातपत्रीकृतनिस्समनित्यभोगविभूतिकं मुक्तोपसृप्यमनौपाधिकमवस्थानम्। व्यूहश्च मुमुक्षुसिसृक्षया प्रदेयसृष्टिस्थितिलयाः शास्त्रतदर्थतत्फलानि ध्यानाराधने लीला चेतीदृशकार्योपयुक्तविभवपरगुणरूपव्यापारशीकरव्यूहनिर्वाहितलोलाविभूतिकं मुक्तिसाधकं चतुर्वावस्थानम्। विभवश्च तच्छायः सुरनरतिर्यगादिः स्वविभवसजातीय ऐच्छः प्रादुर्भाववर्ग इति।..... तत्र प्रादुर्भावाः केचित् साक्षात्, यथा मत्स्यकूर्मादयः। अन्ये तु ऋष्यादिविशिष्टपुरुषाधिष्ठानेन, यथा भार्गवरामकृष्णद्वैपायनादयः। अपरे काले शक्त्यावेशेन, यथा पुरञ्जयादिषु[1]। इतरे च व्यक्तिषु स्वयमेवावतीर्य, यथार्चावतार इति चतुर्धा" (पृ० १८२) इति।

अत्र पराशरभट्टारकेण विभवानां चातुर्विध्यं प्रदर्श्यार्चावतारस्य तत्रैवान्तर्भावः प्रदर्शितः। लक्ष्मीतन्त्रे तु—"अर्चापि लौकिकी या सा भगवद्भावितात्मनाम्। मन्त्रमन्त्रेश्वरन्यासात् सापि षाड्गुण्यविग्रहा। परार्चावतारेऽस्मिन् मम रूपचतुष्टये।" (२।५९-६०) इत्येवं चातुर्विध्यं परब्रह्मणः प्रतन्यते। अत्रार्चावतारस्य स्पष्टं पृथङ्निर्देशो विद्यते। तत्र केचन परव्यूहविभवानां त्रयाणामप्यर्चारूपत्वसंभवादर्चावतारस्य परादिषु त्रिष्वन्तर्भावं प्रदर्शयन्ति। तन्नेति भाष्यकारोऽलशिङ्गभट्टः। तथा हि—"वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्यव्यूहानामेव श्रीकृष्णबलभद्रप्रद्युम्नानिरुद्धरूपेणावतीर्णत्वेऽपि तेषां यथा विभवत्वमेव न व्यूहत्वम्, तथा परव्यूहविभवानामर्चावतारत्वेऽपि तेषां विभवेष्वेवान्तर्भावः, न तु परव्यूहयोरिति" (पृ० १०) इति।

वस्तुतस्तु—"गुणकल्पनयाऽध्यस्तो गुणोन्मेषकृतश्रमः। मूर्तीभूतगुणश्चेति त्रिधा मार्गोऽयमद्भुतः॥" (२।३९) इत्येवं लक्ष्मीतन्त्रेऽपि त्रैविध्यमेव परब्रह्मणो वर्ण्यते। "व्याप्तिमात्रं गुणोन्मेषो मूर्तीकार इति त्रिधा" (५।२०) इत्यहिर्बुध्न्यवचनस्यैव व्याख्यानमेतत्। तथापि—"मूर्तीभूतगुणत्वरूपं विभवत्वं विभवार्चावतारयोरुभयत्रापि समानम्" (पृ० ११) इति भाष्यकारदिशा लक्ष्मीतन्त्रोक्तं परब्रह्मणश्चातुर्विध्यमपि समर्थनीयम्। एवं च सात्वतनिष्ठैर्ब्रह्मणस्त्रैविध्यम्, लक्ष्मीतन्त्रानुयायिभिश्च चातुर्विध्यमुपासितव्यमिति सर्वं सुस्थम्।

तत्त्वत्रयव्याख्यानधृतविष्वक्सेनसंहितायां तु परब्रह्मणः 'पर-व्यूह-विभव-अन्तर्यामि-अर्चावतारभेदेन पञ्चप्रकारत्वमुपदिश्यते। तथैवोपपादितमेतत् तत्त्वत्रये

१. शक्त्याविष्टस्य पुरञ्जयस्य कथानकमेतत्—"तेजसाऽऽप्यायितो विष्णोः पुरुषस्य महात्मनः" (९।६।१६) इत्येवं श्रीमद्भागवते वर्ण्यते।

२ वरवरमुनिविरचितव्याख्यानसहिततत्त्वत्रयस्य वाराणसीमुद्रितं द्वितीयसंस्करणमवलोकनीयम्।

In Public domain. Digitization Muthulakshmi Research Academy

तद्व्याख्याने[1] च। यतीन्द्रमतदीपिकाकारश्रीनिवासदासादयो[2] रामानुजसम्प्रदायानुयायिनः श्रीवैष्णवास्तदेतत् पञ्चविधं परं ब्रह्मोपासते। एवं चातुर्विध्ये पाञ्चविध्ये वा सत्यपि सात्वतनिष्ठैस्त्रिविधं परब्रह्म उपास्यते। विभवावतारस्य पराशरभट्टारकदिशा चातुर्विध्ये स्वीकृते न कोऽपि विरोधोऽत्रावशिष्यते। "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥" (१८।६१) इति भगवद्गीतोक्ताऽन्तर्यामिस्वरूपस्य ब्रह्मणः सत्त्वं सिद्धयत्येव। अत्रापि—"परमेश्वरः। स्थितोऽन्तर्यामिभावेन रूपमासाद्य निष्कलम्॥" (९।९६-९७) इत्येवं ब्रह्मणोऽन्तर्यामित्वं निष्कलत्वं[3] च प्रतिपाद्यते। एवं सत्यपि सात्वतायां त्रिविधस्य परब्रह्मण एवोपासना सविस्तरं वर्णिता।

परब्रह्मलक्षणम्

"सर्वगं परमं ज्योतिरमूर्तममलं हि यत्॥ स एव वासुदेवेति" (८।५२-५३), "महन्तु सततोदितम्" (८।५६) इति सततोदितं वासुदेवाख्यं परंब्रह्म *भूतवास(८।१५१)पदेन, "नारायणः परं ब्रह्म" (१७।४१९) इति *नारायणपदेन च प्रोच्यते। "चिदानन्दघनः शान्तः" (६।२१२) इति,

१. तत्रैव १०१-१२० पृष्ठानि द्रष्टव्यानि।

२. यतीन्द्रमतदीपिका पुण्यपत्तनस्थानन्दाश्रमग्रन्थावलिप्रकाशिता (१९३४ ई० वर्षीयं द्वितीयं संस्करणम्, पृ० ८३-८९) द्रष्टव्या। डॉ० श्रादरमहोदयेनापि स्वकीये भूमिकाग्रन्थे शुद्धसृष्टिनिरूपणप्रकरणे तत्त्वत्रय-तद्भाष्य-यतीन्द्रमतदीपिकासाहाय्येन तदेतत् पञ्चविधं परंब्रह्म व्याख्यातम्।

३. ब्रह्मणो निष्कलं सकलं च स्वरूपं तन्त्रागमेषु प्रतिपाद्यते। अत्रापि विभवपरिच्छेदे तत्प्रदर्शितम्। अन्तर्यामितया निष्कलात्मना च स्थितं आसकामो भगवान् स्वव्यापारवशेन स्वां शक्तिमवलम्ब्य पञ्चानाद्यात्मना सकलं स्वरूपं धारयति (९।९७-९८)। विभवात्मकोऽयं भगवानत्र निष्कलात्मना सकलात्मना चाच्यंत्वेन वर्णितः (९।११४-११५)।

४. "वसन्ति त्वयि भूतानि भूतावासस्ततो हरे" इत्येवं विष्णुसहस्रनामभाष्ये पराशरभट्टेन भूतावासशब्दो व्याख्यातः। एवं च भूतावासपदं वासुदेवस्यैव पर्यायान्तरम्।

५. "आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं मम तत् पूर्वमतो नारायणो ह्यहम्॥" (महाभारते शान्तिपर्वणि ३४१।४०)। "ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः" (१।१०) इति मनुस्मृतौ पाठान्तरम्। नारायणीयोपाख्यानेऽत्र वासुदेव एव नारायणो निर्दिष्टः। रामानुजीये च दर्शने लक्ष्मीनारायणाख्यं मह एव परब्रह्मत्वेनोपास्यते। तथैव च प्रतिपाद्यते लक्ष्मीतन्त्रेऽपि (१।१; २२।५) इत्यादिषु स्थलेषु।

"चिच्छक्तिलक्षणं ब्रह्म त्वाह्लादानन्दलक्षणम्" (२०।१३) इति च तस्य चिदानन्दलक्षणत्वं बोध्यते। "सद्ब्रह्म वासुदेवाख्य" (२।४) इति सदात्मकत्वं प्रतिपादितमेव। एवं च सच्चिदानन्दलक्षणत्वं ब्रह्मणोऽत्रापि स्वीक्रियते। तदेतस्य परस्य ब्रह्मण आराधनाय द्वितीये परिच्छेदे "ॐ शान्तोदितविज्ञानप्राणाय" (पृ० १७) इत्यादिकं मन्त्रमुद्धरन्त्या सात्वतया दशाद्वयमुररीक्रियते। तत्र प्रथमां सततोदिता नित्योदिता वा, अपरा च शान्तोदिता सङ्ज्ञीयते।

परब्रह्मणो दशाद्वयम्

तत्र सततोदितया नित्योदिताऽपरनामधेयया दशया युक्तः परवासुदेव इति, शान्तोदितया च दशया युक्तो व्यूहवासुदेव इत्युच्यते। परवासुदेवे षाड्गुण्यं स्तिमितं व्यूहवासुदेवे च प्रबुद्धमवतिष्ठते। शान्तोदितो व्यूहवासुदेवः षाड्गुण्यमहिम्ना यथायथं शान्तेषु चतुर्षु गुणेषु प्रवृद्धयोश्च द्वयोर्द्वयोर्गुणयोः साहाय्येन क्रमशः सङ्कर्षण-प्रद्युम्न-अनिरुद्धाख्यानि त्रीणि रूपाणि धत्ते। एवं च परब्रह्मणश्चातुरात्म्यं निष्पन्नं भवति। व्यूहदीक्षावसरे तदेतत्—"चतुरात्मानमव्यक्तं शब्दमूर्तिं निराकृतिम्। गुणमात्रैर्विभिन्नं च" (१८।२०७-२११) इत्यादिषु श्लोकेषु वर्ण्यते। चातुरात्म्यं चैतज्जाग्रत्स्वप्नसुषुप्तितुर्याख्येषु चतुर्षु पदेष्ववतिष्ठते। तत्र तुर्यपदस्थिते परब्रह्मणि चातुरात्म्यं स्तिमितं भवतीत्येकमूर्तिपदेन तदुच्यते, एकेनैव च मन्त्रेण तदाराधनं क्रियते। सुषुप्तिस्वप्नजाग्रत्पदेषु चं चातुरात्म्यस्य प्रबुद्धत्वात् तदाराधनाय पृथक्-पृथक् चत्वारो मन्त्रा विनियुज्यन्ते।

सात्वतसंहितायां द्वितीये परिच्छेदे एकमूर्तीयस्याऽव्यक्तस्य गुणमात्रलक्ष्यस्य पराभिन्नस्य तुर्यव्यूहस्य, तृतीये सुषुप्तिव्यूहस्य, चतुर्थे स्वप्नव्यूहस्य, पञ्चमे च परिच्छेदे जाग्रद्व्यूहस्यान्तर्यागविधिः समासेनोदितः। अन्तर्याग-बहिर्यागभेदेन द्विविधं यजनं भवतीति जानन्त्येवागमतत्त्वविदो विद्वांसः। "यागो बिम्बादिषु भगवदर्चनम्" (पृ० १९) इति चाह भाष्यकारः। अन्तर्यागे बिम्बादीनां स्थितिर्न भवतीति तत्र मन्त्रात्मके[1] स्वरूपे भगवानर्च्यते। अतो द्वितीयादिपञ्चमान्तेषु चतुर्षु परिच्छेदेषु तुर्यसुषुप्तिस्वप्नजाग्रत्पदस्थस्य भगवतो मन्त्राः समृद्धृताः।

परस्यापि चतूरूपत्वम्

अत्र भाष्यकारपद्धत्या किञ्चिद्विचार्यते—ननु तर्हि शान्तोदितापरनामधेयतुर्यव्यूहचतुर्मूर्तिप्राधान्यं किमिति वर्ण्यते? इति चेच्छृणु—"अभैदेनादिमूर्तेर्वै

१. अन्तर्यागविधिरत्र मन्त्रात्मक उपदिष्टः, न तु कुण्डलिनीयोगपर इति विभावनीयम्।

In Public domain. Digitization Muthulakshmi Research Academy

संस्थितं [1]वटबीजवत्" (५।८१) इत्युक्त्यनुसारेण परसंज्ञस्य तद्व्यूहस्य परात्परवासुदेवाद्यभिन्नत्वात्। अत एव सुषुप्त्यादिव्यूहवत् प्रत्येकं तद्व्यूहवाचकमन्त्राणामत्रानुक्तिः, परात्परमन्त्रेणैव तस्यापि चारितार्थ्यात्। एवं च परात्परदशायामिव परत्वेऽपि वासुदेवस्यैकस्यैव प्राधान्यं ज्ञेयम्। तर्हि एवमभिन्नत्वे पुनः केन तयोर्भेद इति चेत्, नित्योदितत्वेनेति बोध्यम्। नित्योदितत्वं नाम स्वविभूत्यनुभवदशाविशिष्टत्वम्। शान्तोदितत्वं नाम स्वात्ममात्रानुभवदशाविशिष्टत्वम्।

ननु चैवं शान्तोदितव्यूहेऽप्येकमूर्तिप्राधान्ये व्यूहशब्दस्य स्वारस्यं न सम्भवतीति चेदुच्यते—किं व्यूहशब्दमात्रेण चतुर्णां प्राधान्यमङ्गीकार्यम्? यद्येवमङ्गीक्रियते, तदा—"नित्योदितस्य व्यूहस्य तथा शान्तोदितस्य च" (ईश्व० ८।५२; पार० ८।५१), "यत्र शान्ततरं व्यूहं शान्तोदितमनन्तरम्" (ईश्व० २०।१९८; पार० १९।५३३), "परात्परस्वरूपस्य परस्य चतुरात्मनः। शान्तोदितादिव्यूहानाम्" (पार० १५।२१), "सदोदितस्वरूपस्य वासुदेवस्य वै विभोः। त्रयाणामच्युतादीनां तद्भेदानां तथैव च॥ शान्तोदितस्वरूपस्य परस्य चतुरात्मनः।" (पार० १५।२३-२४) इत्येवमादीनामीश्वरपारमेश्वरवचनानां सर्वत्र परात्परत्वसंज्ञायां नित्योदितदशायाम्, परत्वसंज्ञायां शान्तोदितदशायां च वासुदेवादिचातुरात्म्यसद्भावप्रतिपादकानां का गतिः स्यात्? अतो यद्यपि व्यूहचातुरात्म्यशब्दो सर्वावस्थासाधारणो, अर्थाज्जाग्रत्स्वप्नसुषुप्तितुर्याख्यासु[2] सर्वास्ववस्थासु स्थितस्य परात्परवासुदेवस्य वाचको, तथापि परात्परत्वदशायां परत्वदशायां (तुर्ये व्यूहे) च वासुदेवस्यैव प्राधान्यम्, एक एव मन्त्रः, तदर्चनेनैवोपसर्जनीभूतानामन्येषामप्यर्चनसिद्धिरिति ज्ञेयम्।

१. वटबीजान्तर्गतवटवृक्षीयसूक्ष्मरूपतुल्यशब्दसृष्टिसूक्ष्मरूपशालिनी पूर्वोक्तरूपा त्रिपुरसुन्दर्यैव तादृशसूक्ष्मरूपवत्त्वप्रवृत्तिनिमित्तकपराशब्दवाच्या" (पृ० १७) इति वरिवस्यारहस्ये भास्कररायः। तद्वदेव सर्वोऽपि चातुरात्म्यप्रपञ्चोऽभेदेन परस्मिन् ब्रह्मणि वासुदेवे स्थित इति भावः।

२. जाग्रत्स्वप्नसुषुप्तितुर्याख्यं पदचतुष्टयं लक्ष्मीतन्त्रे (२२।२२-२७) विवृतमत्र भाष्ये (पृ० ३१) समुद्धृतं द्रष्टव्यम्। एतच्च पदाध्वनो रूपम्। तुर्यवर्जमेतद्धेयकोटौ स्थाप्यते। एवं च पदाध्वन एतत्स्वरूपं शैवशाक्तसम्मतपदाध्वापेक्षया विलक्षणमिति ज्ञेयम्। पदाध्वनो हेयत्वादेवात्र पदात्मनो मन्त्रस्यापि जाग्रद्वृत्तित्वं स्थूलत्वं (पृ० १७५) चाप्यभ्युपगतम्।

अत्रेदं बोध्यम्—सात्वतायां द्वितीये परिच्छेदे तुर्यव्यूहस्य एक एव मन्त्रः समुद्धृतः। सुषुप्त्यादिव्यूहत्रयाणां च चत्वारश्चत्वारो मन्त्राः समुद्धियन्ते। तदनुरोधेन तुर्ये व्यूहेऽपि चत्वारो मन्त्रा अपेक्षिता आसन्। न केवलं भाष्ये, संहितायामपि हि चातुरात्म्यचतुष्टयं प्रतिपाद्यते (५।८०-८७)। यदा तुर्ये व्यूहेऽपि चातुरात्म्यं भासते, तदा तत्रापि चत्वारो मन्त्रा विनियोक्तव्या आसन्निति किल भवति स्वाभाविकी शङ्का। तस्या एवं परिहारः क्रियते—पर-व्यूह-विभवाख्यं त्रिविधं खलु ब्रह्म अत्र प्रतिपाद्यते। तत्र द्वितीये परिच्छेदे परस्वरूपस्य विवरणं वर्तते। तृतीयचतुर्थपञ्चमपरिच्छेदेषु च व्यूहस्वरूपस्य सुषुप्तिस्वप्नजाग्रत्पदस्थितस्य वर्णनं भवति। तदेतद् व्यूहाख्यं ब्रह्म चातुरात्म्यपदेनाप्युच्यते। एतच्च चातुरात्म्यं परस्वरूपेऽव्यक्तदशायां तिष्ठतीति तत्रापि चातुरात्म्यपदप्रयोगो भवति, तुर्यव्यूहनाम्नाऽपि च तदुच्यते। अत्र च नित्योदितशान्तोदिताख्यं दशाद्वयमङ्गीक्रियते। नित्योदितदशा [1]परात्परवासुदेव इति, शान्तोदितदशा च परवासुदेव इत्युच्यते। एवमुभयोरपि दशयोरत्र वासुदेवस्यैव प्राधान्यम्, अन्यस्य सङ्कर्षणादित्रयस्य, अच्युतादित्रयस्य[2] च तदाऽव्यक्तरूपेणैवावस्थानात्। एतच्च स्पष्टमेवोक्तं संहितायाम्—"अभेदेनादिमूर्तेर्वै संस्थितं वटबीजवत्" (५।८१) इति। एवं

१. एवं च परात्परवासुदेव इति परवासुदेव इति पदद्वयं दशाद्वयद्योतनाय प्रयुक्तम्। वस्तुतस्तु परवासुदेवो नित्योदितः, व्यूहवासुदेवश्च शान्तोदित इत्युच्यते, "एतत्पूर्वं त्रयं चान्यद् ज्ञानाद्यैर्भेदितं गुणैः" (१।२६) इत्यत्र, "अत्रापि पूर्वमेवोक्तं रूपमस्योपचर्यते" (३।८) इत्यत्र च तथैव प्रतिपादनात्। एवमेवोपबृंहितमहिर्बुध्न्यसंहितायां पञ्चमाध्याये, लक्ष्मीतन्त्रेऽपि च द्वितीयदशमयोः। अस्यां स्थितौ विष्वक्सेनसंहितानुसारं परवासुदेवस्यैवैतद् दशाद्वयमिति भाष्यकारव्याख्यानं सुखावबोधफलकमत्रेयम्। अत एवास्माभिः परब्रह्मणो दशाद्वयव्याख्यानावसरे सात्वताद्युक्त एव क्रमो मुख्यत्वेन वर्णितः।

२. "अच्युताद्या मूर्तयस्तिस्रः" (पृ० २९) इति, "सङ्कर्षणप्रद्युम्नानिरुद्धानामेवाच्युतसत्यपुरुषापरनामधेयत्वं बोध्यम्" (पृ० २९) इति च भाष्यकारः। एताश्च वासुदेव-अच्युत-सत्य-पुरुषाख्याश्चतस्रो मूर्तयोऽप्ययक्रमेण विदिक्षु पूज्यन्ते (पृ० ८८)। एतासां चत्वारो मन्त्राः (पृ० ५५, ८८, १०५, १३३) अत्र द्रष्टव्याः। जयाख्यायां मूर्तिचतुष्टयस्यास्य स्वरूपादिकमवलोकनीयम् (४।२-१९)। वैखानसास्तु पुरुष-सत्य-अच्युत-अनिरुद्धाख्यं मूर्तिचतुष्टयं समाराधयन्ति। एतच्चात्रैव (पृ० २९) भाष्ये वर्णितं द्रष्टव्यम्, अत्रोद्धृतं महाभारतीयं सार्धश्लोकद्वयं दाक्षिणात्ये पाठ एव समुपलभ्यत इति च विभावनीयम्।

In Public domain. Digitization Muthulakshmi Research Academy

त्रादिमूर्तेर्वासुदेवस्यैव प्राधान्यप्रदर्शनाय, तुर्यव्यूहापराभिधस्य परस्वरूपस्याराधनाय च एक एव मन्त्रोऽत्र निर्दिष्ट इति।

एवमत्र सात्वतायामेकमूर्तेः परात्परवासुदेवस्य, व्यूहानां वासुदेवादीनां तुर्याद्यवस्थाभेदस्यार्खिलस्यावतारक्रमो ध्यानं मन्त्रपूर्वकमर्चनं च प्रोक्तम्। अत्रायं विशेषोऽवगतव्यः—अस्पन्दलक्षणमलोलीभूतं नित्योदितं परात्परं भगवन्तं तुर्यात्मना तुर्यरूपेणाभिन्नं स्मरेत्। षाड्गुण्यविग्रहमाद्यं[1] चातुरात्म्यम्, अर्थाच्चातुरात्म्यचतुष्टये प्रथमं सुषुप्तिपदस्थं वासुदेवं च "यद्यप्यरूपो भगवान्" (३।८) इत्युक्तदिशाऽलाञ्छनं स्मरेत्, अन्यत् त्रितयं (सङ्कर्षणप्रद्युम्नानिरुद्धाख्यं) च पारमेश्वरं सामर्थ्यं सृष्ट्यर्थं लोलीभूतं स्मरेदिति।

यः साधको विशेषव्यक्तिलक्षणं परव्यूहविभवाख्यतत्तन्मूर्तिविशिष्टं भगवन्तमर्चितुमिच्छति, तं साधकं स्वबुद्धया संकल्प्य स्वाभिमुखं ज्ञात्वा तत्कालसमनन्तरं तदिच्छासमनन्तरमेवं ध्रुवा पारमेश्वरी सामर्थ्यशक्तिः स्वयमेव स्पन्दतामेति, मन्त्री साधको यत्र कृतास्पदो यन्मन्त्रसाधनमिच्छति तन्मंन्त्रमग्निकणवत् सूते च। तत्स्पन्दनमात्रेणाग्नेः स्फुलिङ्गवन्मन्त्रः समुद्भूतो भवतीति भावः। तन्मन्त्रमाकाशात् तारकमिव हृत्कमलकर्णिकामध्ये आगतं भावयेत्। तन्मन्त्रमध्यादाराध्यं मन्त्रनाथमादिमूर्तिस्वरूपेण परवासुदेवरूपेण, चतुर्मूर्तिस्वरूपेण, एकैकमूर्तिस्वरूपेण, आहोस्विन्नानाऽऽकृत्यात्मना वैभवीयेन क्रमेण पद्मनाभादिभेदेन वा उदितं स्मरेत्। इति शम्॥

१. षाड्गुण्यविग्रहमाद्यं चातुरात्म्यमित्यनेन व्यूहवासुदेवोऽभिप्रेत इति मन्तव्यम्।

शक्तिसंगमतन्त्रविषये किञ्चित्

अस्य ग्रन्थस्य कालीखण्डाख्यः प्रथमो भागः १९२२ ई०, ताराखण्डाख्यो द्वितीयो भागः १९४१ ई०, सुन्दरीखण्डाख्यस्तृतीयो भागः १९४७ ईशवीये वर्षे प्रकाशित आसीत्। ततः परं ग्रन्थस्याऽस्य सम्पादकाः श्रीमन्तो डॉ० विनयतोषभट्टाचार्यमहोदया भगवत्यास्त्रिपुरसुन्दर्या धाम मणिपुरमधिगतवन्त इति हेतोः प्रकाशनमवरुद्धमासीत्। त्रिंशद्वर्षानन्तरमधुनाऽचिरादेवाऽस्य चतुर्थो भागश्छिन्नमस्ताखण्डाख्यः प्रकाशयिष्यते।

नामान्तराणि वैशिष्ट्यं च

सरस्वतीभवनपुस्तकालयेऽस्य ग्रन्थस्य चतुर्णामपि खण्डानां प्रायोऽष्टादशमातृका अस्माकं दृष्टिपथमायाताः। षट्शाम्भवरहस्यमस्यैव ग्रन्थस्य तृतीयः खण्डः, तारासूक्तमिति च चतुर्थस्य खण्डस्याऽपरं नामधेयम्। सम्मोहनतन्त्रमपि शक्तिसंगमचतुर्थखण्डादभिन्नमेवेति सप्रमाणं साधितमस्माभिरन्यत्र। तेन हि सम्मोहनतन्त्रमेतत् कम्बुजशिलालेखसमुद्भूतात् सम्मोहनतन्त्रादभिन्नमेवेति डॉ० प्रबोधचन्द्रबागचीमहोदयानां रिक्तमेतद्वचः।

प्रायोऽशीतिसंख्याकानां ग्रन्थानां सार्धशताधिकसम्प्रदाय-मत-क्रम-मार्गादीनां च परिचायकस्याऽस्य ग्रन्थस्य वैशिष्ट्यमङ्गीकर्तव्यमेव। प्राचीनेषु तन्त्रेषु नाऽस्य परिगणनं स्मरणं वेत्येतावता नाऽस्य महत्त्वं हीयते। अन्यत्राऽनुपलब्धानामनेकेषां ग्रन्थनाम्नां तद्विषयाणां लुप्तप्रायाणामनेकेषां सम्प्रदायानामाचार्याणां च विशिष्टानां मतानामत्र समुपलम्भाद् ग्रन्थोऽयं तान्त्रिकविश्वकोशस्य महिमानं धत्ते। अस्मादेव वैशिष्ट्यादयं न कस्याप्येकस्य सम्प्रदायस्य ग्रन्थ इति वक्तुं शक्यते। अत्र हि प्रायः सर्वेष्वेव प्रकरणेषु विभिन्नेषु सम्प्रदायेषु कृतपदानां सूक्ष्मतमानां विषयाणां विश्लेषणं दरीदृश्यते। यद्यपि पटलसमाप्तिपुष्पिकासु विषयनिर्देशो विद्यते, किन्तु तद्भिन्नानामपि नैकेषां विषयाणां तत्र वर्णनं समस्ति। त एव विषयाः पटलान्तरेषु खण्डान्तरेषु च प्रतिपादिताः। प्रसङ्गेऽस्मिन्—"पुनरुक्तिर्न मन्तव्या विद्याभेदाद्विशेषता" (i.५.१०१) इत्युक्तिरवश्यमेव स्मृतिपदवीमानेतव्या।

प्राचीनेषु तन्त्रेषु यथा दार्शनिका विचारा योगशास्त्रीयाश्च प्रक्रिया विस्तरेण प्रतिपाद्यन्ते, न तथा नवीनेषु तेषु। तन्त्रस्याऽस्याऽऽविर्भावकालोऽर्वाचीन

In Public domain. Digitization Muthulakshmi Research Academy

इति कृत्वा सैव स्थितिरत्राप्यवलोक्यते। चतुर्थखण्डसमाप्तौ षड्विधवन्ध्यानामपस्मारब्रह्मराक्षसादीनां च वर्णनमप्रासङ्गिकमिव प्रतीयते, किन्तु ततः प्राग् द्विविधशाबरमन्त्रप्रतिपादनानन्तरम्—"तेन शाबरमन्त्रेण सर्वदोषान् निवारयेत्" (११.१५) इत्युक्तेः के के दोषाः शाबरमन्त्रप्रभावेण परिहृता भवन्तीति विषयस्याऽस्य प्रतिपादनमुखेनैव तेषां दोषाणां वर्णनमत्र कृतमिति मन्तव्यम्।

अवतारकालो देशश्च

शङ्करोत्पत्तितः देवि महाकलियुगे शिवे।
वर्षसाहस्रकस्याऽन्ते त्रिंशद्वर्षोत्तरं शिवे॥
तन्त्रस्याऽस्य महेशानि प्रकाशोऽत्र भविष्यति।
(iv. ८.२१७-२१८)

इत्येवमत्र तन्त्रस्याऽस्य प्रकाशकालः प्रदर्श्यते। भगवत्पादस्य शङ्कराचार्यस्य उत्पत्तिश्च एवमत्र वर्णिता—

षट्शतीवत्सरान्ते तु द्विसप्तत्युत्तरं शिवे।
आविर्भवति देवेशि! दिव्यौघद्वारतः शिवे॥
बौद्धपाषण्डनाशार्थं सम्प्रदायार्थमेव च। इति।
(i. १. १६-१७)

शङ्कराचार्योत्पत्तिरेवाऽत्र वर्णितेति यद्यपि स्पष्टतया नाऽत्र प्रतीयते, किन्तु चतुर्थखण्डीयशङ्करोत्पत्तिप्रकरणस्य तुलनया सैवाऽत्र वर्णितेति निश्चीयते। अत्र वैक्रमः संवत्सरो यदि गृह्यते, तर्हि ६७२ (द्वासप्तत्युत्तरषट्शतम्) वर्षेषु व्यतीतेषु शङ्कराचार्यस्योत्पत्तिः स्वीकर्तव्या। ततश्च १०३० (त्रिंशदुत्तरैकसहस्र)-वर्षाऽनन्तरमस्य तन्त्रस्य प्रकाशः समजायत, अर्थादस्य तन्त्रस्याविर्भावः १७०२ (द्व्युत्तरसप्तदशशत)वैक्रमवत्सरेषु व्यतीतेषु समभूत्। तदनुसारं १६४५ (पञ्चचत्वारिंशदुत्तरषोडशशततमे) ईशवीये वर्षे तन्त्रमिदं प्रकाशितमभूत्।

शक्तिसंगमतन्त्रम् आगमवागीशेन कृष्णानन्देन स्वकीये तन्त्रसारे समुपहृतम्। अस्मिंश्च तन्त्रे निम्बार्क-रामानन्द-राधावल्लभ-हरिव्यास-सम्प्रदायानामुल्लेखो वर्तत इति कृत्वा श्रीमता बी० भट्टाचार्यमहोदयेन प्रथमखण्डप्रस्तावनायामस्य तन्त्रस्याविर्भावकालः १५८१ (एकाशीत्युत्तरपञ्चदशशतमितः) ईशवीयो वर्षो निर्धारितः (पृ० v-vii)। अत्र तैर्गोकुलेशः सम्प्रदायो न समालोचितः। पुष्टिमार्गसंस्थापकानां वल्लभाचार्याणां पौत्रेण गोकुलनाथेन हि सम्प्रदाय एष संस्थापितः। डॉ० सुरेन्द्रनाथदासगुप्तमहोदया गोकुलनाथस्य स्थितिं १५५४ई० वर्षतः १६४३ ई० (चतुःपञ्चाशदुत्तरपञ्चदशशततमवर्षतस्त्रि-

चत्वारिंशदुत्तरषोडशशततमेशवीयवर्षम्) यावद् निर्धारयन्ति। सम्राजो जहाँगीरस्य समये (१६०५-१६२७ ई०) तैः स्वकीयः सम्प्रदायः संस्थापित इत्यनुश्रूयते। अतश्च १६४५ ई० (पञ्चचत्वारिंशदुत्तरषोडशशतेशवीये) वर्षे शक्तिसंगमतन्त्रस्याऽऽविर्भावः समजायत इत्युचितमेव प्रतिभाति। डॉ० भट्टाचार्यमहोदयाः कृष्णानन्दस्य आगमवागीशस्य तन्त्रसारकर्तुः समयः १६०७ (सप्तोत्तरषोडशशततमेशवीयवर्ष)समीपस्थ इति निर्धारयन्ति। श्रीचिन्ताहरणचक्रवर्तिमहोदयाः प्रतिपादयन्ति यत् कृष्णानन्दश्चैतन्यसमकालिकः (१४८५-१५२३ ई०) इत्यनुमीयते, यद्यपि केचन विद्वांसस्तमतीव परवर्तिनं साधयन्तीति। अस्यां स्थितौ कृष्णानन्देन शक्तिसंगमस्थानि वचांस्येवोद्धृतानीति चेत् तस्य कालः शक्तिसंगमाविर्भावकालादुपर्युक्तात् पश्चात्तन एव स्वीकर्तव्यः।

"समाप्ते फाल्गुने मासे कृष्णैकादशिका च या" (iv. ६. २२), "श्रावणे चाष्टमी शुक्ला बुधरोहिणीसंयुता। वज्रयोगे मध्यरात्रौ पूर्णः कृष्णो हरिः स्वयम्॥" (iv. ६. ५४) इत्यादिभिर्वाक्यैर्जयन्तीप्रकरणे पठितैर्ज्ञायते यत् तन्त्रस्याऽस्याऽऽविर्भावो विन्ध्यदक्षिणवर्तिनि कस्मिंश्चित् प्रदेशे संजात इति। उत्तरे हि भारते फाल्गुनमाससमाप्तौ शुक्लैकादशिका समापतति। एवमेव भाद्रकृष्णाष्टम्यां भगवतः श्रीकृष्णस्य जयन्ती मान्यते।

तन्त्राणां कालविचारः

श्रीमता चिन्ताहरणचक्रवर्तिमहोदयेन तन्त्राणां कालविषये च युक्तियुक्तो विमर्शः समुपस्थापितः। तत्रोद्धृतैः कूर्म-भागवत-पराशरपुराणादीनां पाञ्चरात्रप्रामाण्यप्रभृतिग्रन्थानां च वचनैर्वैष्णवागमाः शैवागमाश्च मानवकृतय इति सिद्ध्यति, किन्तु वचनेष्वेषु साम्प्रदायिकत्वारोपं को नाम निवारयेत्? अथवा "न निन्दा निन्द्यं निन्दितुं प्रवर्तते, अपि तु विधेयं स्तोतुम्" इति न्यायेन प्रश्न एष समाधातुं शक्येत। यथाश्रुतग्रहणे हि सुन्दोपसुन्दन्यायेन सर्वेषामप्रामाण्यमेवापतेत्।

वेदागमपुराणादिशास्त्राणां कालविषये कर्तृविषये च द्विविधा दृष्टिः साम्प्रतं प्रचरति—अपौरुषेयाणि दिव्यानि मुनिभाषितानि वा शास्त्राणीति प्राच्या, सर्वाणि समये समये मानवैरेव निर्मितानीति प्रतीच्या। कस्मिंश्चिद् विशिष्टे देशे काले च तेषां तेषां शास्त्राणां प्रचारोऽवलोक्यते। दीर्घकालनिरन्तरसत्कारासेवितेनाभ्यासेन शुद्धान्तःकरणानां योगिनां चेतस्सु शब्दब्रह्मवर्त्मना परापश्यन्त्यादिक्रमेण शास्त्राणामवतारो देशकालानुरोधी प्रवर्तत इति तन्त्रागमसम्मतः पन्थाः। अत एव पर्यायसप्तकप्रकरणे देशपर्याये कालपर्याये च बहूनां

In Public domain. Digitization Muthulakshmi Research Academy

तन्त्राणामाविर्भावोऽत्र निरूप्यते, "गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः। प्रश्नोत्तरपरैर्वाक्यैस्तन्त्रं समवतारयत् ॥" इति च प्रतिपाद्यते योगिनीहृदयदीपिकोद्धृते (पृ० २) महास्वच्छन्दवचने। "रौद्रा रुद्रैः शिवाविष्टैरुद्गीर्णा न स्वबुद्धितः" (१. ४३) इति मृगेन्द्रागमचर्यापादवचनमप्यत्रावधेयम्।

श्रीकण्ठ्यां संहितायां नित्याषोडशिकार्णवे सर्वोल्लासतन्त्रोद्धृततोडलोत्तरतन्त्रे च प्रदर्शितासु चतुष्षष्टितन्त्रनामावलीषु न दृश्यते शक्तिसंगमतन्त्रस्य नाम। महासिद्धसारतन्त्रे विष्णुक्रान्ता-रथक्रान्ता-अश्वक्रान्ता-भेदेन प्रत्येकं चतुष्षष्टितन्त्राणि परिगणितानि। तत्र रथक्रान्ताविभागेऽस्य नाम दृश्यते। अतोऽनुपदमेव प्रदर्शितः शक्तिसंगमावतारकाल एतदनुगुण एव।

शक्तिसंगमे स्मृतानां ग्रन्थानाम्, पर्यायसप्तकेषु पठितानां शास्त्राणाम्, कादि-हादि-कहादिमतानां देशानां च, केरल-काश्मीर-गौडानां दक्षिणवामानामन्येषां परश्शतानां क्रमाणां च, दर्शनयोगकर्मणाम्, दशमहाविद्यानाम्, दीक्षाभिषेक-मेरु-श्रीचक्रादीनाम्, शक्तियोगस्य, सिद्धीनां च विषये विस्तरेणोपोद्घाते विचारः कृत इति तत्रैव द्रष्टव्यम्।

द्विविधसिद्धिसमीक्षा

डॉ० बी० भट्टाचार्यमहोदया अणिमाद्यष्टसिद्धीनाम्, अष्टादशविधानां चतुर्विंशतिप्रकाराणां च सिद्धीनामुल्लेखं विधाय ब्रह्मवैवर्तपुराणवर्णितासु सिद्धिषु काश्चन वर्णयन्ति। हिन्दूतन्त्रेष्वेताः सिद्धयो वर्ण्यन्ते, एताभ्यो भिन्नाः खड्ग-अञ्जन-पादलेप-अन्तर्धान-रसरसायन-खेचर-भूचर-पातालाख्या अष्टौ सिद्धयो बौद्धतन्त्रेषु स्वीक्रियन्त इति च तेऽभिनिविशन्ते। बौद्धतन्त्रवर्णिताः सर्वा एताः सिद्धयः शक्तिसंगमतन्त्रेऽपि सन्ति, किन्त्वेतादृशान्युदाहरणानि हिन्दूतन्त्रेषु बौद्धतन्त्राणां प्रभावस्य सूचकानीति तेषामभिप्रायः। डॉ० बी० भट्टाचार्यमहोदया डॉ० प्रबोधचन्द्रबागचीमहोदयाश्च महताऽऽटोपेन विषयममुं प्रसाधयन्ति। पद्मान्तक-मञ्जुघोष-वैरोचनाष्टक-पार्श्वनाथ-पद्मावतीप्रभृतयः शब्दा न व्याकृताः शक्तिसंगमादिषु तन्त्रेषु वैशद्येन, यथा हि व्यावर्ण्यन्ते बौद्धजैनादिषु तन्त्रेष्विति परवर्तिषु केषुचित् तन्त्रेषु बौद्धादीनां तन्त्राणां प्रभावोऽङ्गीकर्तव्य एव, तथापि भट्टाभिनवगुप्तकालादर्वागाविर्भूतेषु तन्त्रेषु नेदृशः प्रभावोऽवलोक्यते। प्राचीनेषु तन्त्रेष्वपि नित्यापोडशिकार्णवप्रभृतिष्वेताः सिद्धय उपलभ्यन्त इति बौद्धतन्त्राणां हिन्दूतन्त्राणां च सिद्धयो भिन्ना इति व्याहतं वचः। प्राचीनानां हिन्दूतन्त्राणां बौद्धतन्त्रेषु प्रभाव इत्यपि सप्रमाणं साधयितुं शक्यते।

वस्तुतस्तु सर्वमेतद् भारतीयं ज्ञानम्। वैदिका बौद्धा जैनाश्च शैवा वैष्णवाश्च विद्वांसः सहैव निवसन्ति स्म। परस्परभावापोद्वापरूपेणैव भारतीयस्य सम्पूर्णस्य ज्ञानस्य विकासः समजायत। धर्मसम्प्रदायनिरपेक्षं देशकालानुरोधि दुराग्रहवर्जितमनुशीलनमेव यथार्थां स्थितिं प्रकाशयेत्। श्रद्धेयचरणैः श्रीगोपीनाथकविराजमहोदयैर्मन्त्रयाननाम्ना प्रसिद्धानि बौद्धतन्त्राणि वज्रयान-सहजयान-कालचक्रयान-भेदेषु विभज्यन्ते। अत्रत्याः सर्वे विषयाः प्राचीनेषु तन्त्रग्रन्थेष्वपि समानमाना अवलोक्यन्त इति प्राचीनानां तन्त्राणां त्रिभेदभिन्नानां बौद्धतन्त्राणां च तुलनात्मकमनुशीलनं विधेयताकोटिमाटीकते, यद्धि नाद्यावधि संजातम्। तदैव चतुरशीतिसिद्धानां विषयेऽपि किमपि याथार्थ्येन वक्तुं शक्यते। शक्तिसंगमतन्त्रे हि नवनाथानां चतुरशीतिसिद्धानां च दशाधिकेषु स्थलेषु सहैवोल्लेखो विद्यते, साम्प्रतमपि च तेषां सम्प्रदायनिरपेक्षा स्थितिरङ्गीक्रियते। नैकैर्विद्वद्भिः कृतेन आधुनिकेनाऽनुशीलनेन सर्वे सिद्धा बौद्धमतावलम्बिनो निर्धार्यन्ते। वस्तुतस्तु मत्स्येन्द्रनाथ एव सकलकुलशास्त्रावतारकतया प्रसिद्धः। स च सिद्धानां नाथानां च प्रथमः। तेन प्रवर्तितासु षट्संख्याकासु ओवल्लीषु प्रभु-पाद-बोधिशब्दान्ता अपि सिद्धा अवतेरुः, आनन्द-आवलि-योगिशब्दान्ता अपि चेति शैवानां शाक्तानां बौद्धानां च त्रिविधानां तन्त्राणां कौलत्वेन स्वरूपं समानमेव, योगपद्धतिः क्रियापद्धतिश्च समानैवेति विभावनीयं विपश्चिद्भिः।

बाह्याभ्यन्तरपूजाविमर्शः

खण्डत्रयस्य सम्पादका डॉ० बी० भट्टाचार्यमहोदया द्वितीयखण्डप्रस्तावनायां बाह्यशक्तिपूजासम्बद्धानि प्रकरणान्यपि कुण्डलिनीशक्तिपरकतया नीत्वा सर्वत्र आन्तरवरिवस्यामेव समर्थयन्ति। किन्तु—"मद्यं मांसं तथा मत्स्यं मुद्रा मैथुनमेव च। एभिरेव कृता पूजा कुलाचारः प्रकीर्तितः ॥" (ii. ३६.२०-२१), "चतुर्विधाऽपि मुक्तिर्हि नीवीमुक्तौ प्रतिष्ठिता" (iv. २.११३), "रक्तरूपं श्वेतरूपं श्लक्ष्णं परमचिक्कणम्। तत्त्वं संजायते तस्याः कुण्डसाराभिधं भवेत् ॥" (iv. ३.११२-११३), "हृस्ताहस्तिकया योगो निह्नवः परिकीर्तितः" (iv. ३.२०८), "योनिं विना महेशानि न किञ्चिज्जगतीतले" (iv ४. ३०-३३) वचनानामीदृशानां कामशास्त्रमन्तरा नहि धर्मशास्त्रेण कश्चन सम्बन्धः समस्ति। प्रत्युत—"स्वमातृमपि गच्छन्तं कौलिकं न निवारयेत् ॥ साक्षात्तु भगिनी या तु चूडाचक्रे शुभावहा। स्वपुत्री च शुभा प्रोक्ता ऊर्मिलाचक्रसम्मते ॥" (iv ११.१४-१५) इत्यादीनि, कौलतीर्थपटले (ii. १३) पठितानि च वचनानि महत् सामाजिकं वैशसमापादयन्ति। सत्यमेवोक्तं श्रीमद्भागवते—

In Public domain. Digitization Muthulakshmi Research Academy

जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान् व्यतिक्रमः।
यद्वाक्यतो धर्म इतीरितः स्थितो न मन्यते तस्य निवारणं जनः॥ इति।

नहि नासिकायां सत्यां स्वर्गो नाऽवलोकयितुं शक्यत इति विग्रंसम्प्रदायोऽऽयं प्रवर्तनीयः। हिंसाबहुलं वैदिककर्मकाण्डं बुद्धमहावीरादिभिः समालोचितं सद् यथा साम्प्रतं विरलतामापेदे, तथैव सौन्दर्यलहरीकारेण लक्ष्मीधरप्रभृतिभिश्च—"अर्घपात्रं यागधाम दीप इत्युच्यते त्रयम्। रहस्यं कौलिके यागे तत्रार्घः शक्तिसंगमात्॥" (तन्त्रा० २९.१४.१५) इत्याद्यभिनवगुप्तादिप्रदर्शितं रहस्यात्मकौलिकं बाह्यमर्चनं निषिध्य योगप्रक्रियाप्रधानमान्तरमर्चनं समयिमतनाम्ना वैदिकप्रक्रियायां परिगृहीतम्। शक्तिसंगमन्त्रेऽपि—"ब्राह्मणेन तथा कार्यं ब्राह्मण्यं न विनश्यति" (i. ८ १७; ९-३६; ii. १-३४) "वेदेन रहितं यत्तु तन्न कुर्याद् द्विजः क्वचित्" (i. ८.३३), "वेदमूलाः क्रियाः सर्वा ब्राह्मणो वेद एव च। प्राणा वरं प्रयच्छन्तु ब्राह्मणो नार्पयेत् सुराम्॥" (i. ९.५१), "गुडार्द्रकरसेनैव सुरा तु ब्राह्मणस्य च" इत्यादिप्रकरणेषु वेदविरुद्धाचरणं सर्वथा प्रतिषिद्धम्, वर्णधर्मानुसारेण तान्त्रिकविधीनां समादरश्च कर्तव्यः (i. २.८०.८२; ii. १.३३-३६) इति सूचितम्। वर्तन्ते हि तादृशा आचारविचारा विचित्रास्तेषु तेषु वर्णेषु जातिषु च। "यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः" (वा० अ० १०३।३०) इति वचनानुसारं मानवैः स्वीयाचारविचारानुसारं तास्ता देवताः समर्च्यन्ते। मानवमात्रस्य कल्याणाय हि प्रवर्तते तन्त्रशास्त्रम्। ते च स्वीयाचारानुसारमेव प्रवर्तिताः परमतत्त्वाधिगमाय सारल्येन समर्थाः स्युरिति विभाव्य तन्त्रशास्त्रीया नानाविधाः सम्प्रदायाः प्रवृत्ताः सन्ति देशकालानुसारम्। बाह्या इमे आचारा विचाराश्च देशभेदेन कालभेदेन च भिद्यन्ते, कालातीताश्च भवन्ति तेषु केचन धर्माः। अथवा—

स्त्रीमुद्रां झषकेतनस्य महतीं सर्वार्थसम्पत्करीं
ये मोहादवधीरयन्ति कुधियो मिथ्याफलान्वेषिणः।
ते तेनैव निहत्य निर्दयतरं मुण्डीकृता लुञ्चिताः
केचित् पञ्चशिखीकृताश्च जटिनः कापालिकाश्चापरे॥

इति यशस्तिलकचम्पूधृत(भा० २, पृ० २५२)नीलपटोक्तिगूढाभिप्रायमन्वीक्ष्यापक्वाशयानां योगिनां चित्तविकारोपशमाय यामलो विधिर्यथाकथञ्चित् समर्थयितुं शक्यते। श्रीमता भास्कररायेण तन्त्राणां धर्मशास्त्रेऽन्तर्भावं कुर्वता—"तेषां प्रामाण्यसमर्थनं त्वस्मदीये त्रिपुरसुन्दरीवाह्यवरिवस्याविधौ द्रष्टव्यम्, तन्त्रराजव्याख्याने च विस्तरेण तन्त्राणां धर्मशास्त्रेऽन्तर्भावः प्रपञ्चयिष्यते" इति प्रोच्यते। तन्त्रराजव्याख्यानस्य भास्कररायकृतस्यानुपलम्भात् तत्र तन्त्राणां

धर्मशास्त्रेऽन्तर्भावः सार्वात्म्येन आंशिकरूपेण वा कृत इति ज्ञातुं न शक्यते। याज्ञवल्क्यस्मृतिव्याख्यात्राऽपरार्केण शैवपाञ्चरात्राद्यागमानामांशिकं प्रामाण्यमङ्गीकृतम्। शाक्ततन्त्राणामपि तयैव पद्धत्या आंशिकमेव प्रामाण्यं सिद्धयति। तत्रापि बाह्यशक्तिवरिवस्याप्रतिपादकानि शास्त्राणि कामशास्त्राङ्गत्वेनैव प्रामाण्यं लभेरन्, न धर्मशास्त्राङ्गतयेति निबन्धकारसम्मतः पन्थाः।

शर्मण्यदेशीयेन विदुषा डॉ० विण्टरनित्जमहोदयेन प्रोच्यते—"पुराणानां तन्त्रशास्त्राणां चानुशीलनं नानन्ददायकं कार्यम्। तन्त्रशास्त्राणां विषये कथनमेतत् सविशेषं घटते। तानि हि हीनकोटिकैर्लेखकैर्व्याकरणनियमविहीनायां भाषायामावद्धानि" इति। यद्यपि परावाक्कालिकान् कांश्चन तन्त्रग्रन्थानवलोक्य विदुषा लेखकेन धारणेयं स्थिरीकृता, प्राचीनेषु हि तन्त्रग्रन्थेषु नैवंविधा दोषाः समवलोक्यन्ते, तथापि विचारणीयेयमुक्तिस्तत्रभवतो विण्टरनित्जमहोदयस्य। वैष्णवेषु, शैवेषु, शाक्तेषु च सम्प्रदायेष्वाध्यात्मिकक्षेत्रेष्वपि रहस्यात्मिकाः काश्चन क्रियाः साम्प्रतमपि प्रवर्तन्ते। "अन्तः शैवा बहिः शाक्ताः सभामध्ये च वैष्णवाः" इत्येतादृशं द्वैधीभूतं जीवनं यापयन्ति केचन। भगवतः श्रीकृष्णस्य मोहकं रूपमेभिराराध्यते, न लोकमङ्गलकारि। मर्यादापुरुषोत्तमस्य रामभद्रस्य चरितमपि कलुषीक्रियते। योगच्छद्मना देशे विदेशेषु च प्रचारयन्ति ते रहस्यात्मिका एताः क्रियाः। वस्तुतो धर्ममोक्षयोश्छलेनार्थकामयोः साम्राज्यमेतत् प्रसरति। "मनस्यन्यत् वचस्यन्यत् कर्मण्यन्यत्" इत्येवं विमुक्तासु उत्कृष्टासु समाजव्यक्तिषु किं न स्याद् वचस्येव स्थितिराध्यात्मिकताया नैतिकताया वेति स्वयमेव निभालयन्तु सुधियः। वैचित्र्यमेतदवलोक्य सीदति साम्प्रतिकः साधारणो मानवः। विषादस्याऽस्य परिहाराय, आध्यात्मिकानां चिरन्तनभावानां स्थापनाय, सम्पूर्णस्य मानवसमाजस्य सुव्यवस्थाये च आवापोद्वापपद्धत्या वैदिकतान्त्रिकश्रुतीनां समन्वयमुखेन प्रवर्तयितव्यो नूतनो मानवो धर्मः। एतदर्थं च—

यद्यप्यस्ति त्रिकालज्ञस्त्रैलोक्याकर्षणक्षमः।
तथापि लौकिकाचारं मनसाऽपि न लङ्घयेत्॥
(ii. ४६.४२-४३)

इति शक्तिसंगमतन्त्रवचनमेतत् साहाय्यमाचरिष्यतीति शम्॥

In Public domain. Digitization Muthulakshmi Research Academy